३१ यस्त्वा शाले प्रतिगृह्णाति येन चासि मिता त्वम्- प्रतिऽगृह्णाति, असि ९. ३. ९.

३२ यस्त्वा शाले निमिमाय संजभार[4] वनस्पतीन्- निऽमिमाय, सम्ऽजभार ९. ३. ११.

३३ यः कृणोति प्रमोतमन्धं कृणोति पूरुषम् - कृणोति । प्रऽमोतम् । कृ- ९. ८. ४.

३४ य ऊरू[5] अनुसर्पन्त्यथो एति गवीनिके-—अनुऽसर्पन्ति, एति ९. ८. ७.

हृद ३५ या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः- -उपऽऋषन्ति, अनुऽतन्वन्ति ९. ८. १४.

W uparsánti CA III 47 prescribes uparsánti instead of upar—

३६ याः पार्श्वे उपर्षन्त्यनुनिक्षन्ति पृष्टीः (उपऽऋषन्ति, अनुऽनिक्षन्ति ९. ८. १५.) इति द्वे ।

अनुसर्पन्तीति ३७ या गुदा अनुसर्पन्त्यान्त्राणि मोहयन्ति च- -अनुऽसर्पन्ति, मोहयन्ति ९. ८. १७.

३८ या मज्ज्ञो निर्धयन्ति परूंषि विरुजन्ति च (निःऽधयन्ति, विऽरुजन्ति ९. ८. १८.) इति द्वे ।

14b द्विनतिके वा चपरे वा :—

३९ यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहात्युषसश्च केतून्—जहाति with च १०. १. ३२.

४० यो विद्यात्सप्त प्रवतः सप्त विद्यात्परावतः—विद्यात्, विद्यात् १०. १०. २.

1. Vn. गर्भं प्रतिमृशात्. 2 Vn आम्ना 3 Vn बभस्ति. 4. Vn. स जभार. 5. Vn. ऊरू.

चींद्रमैः ४१ यदनूचीन्द्रमैरात्वं ऋषभोऽह्वयत्—ऐः;√इ; आत्। त्वा। ऋषभः। अह्वयत् only one Pada ms. अह्वयत् १०. १०. १०.

४२ योऽभियातो निलयते त्वां रुद्र निचिकीर्षति—निऽलयते, निऽचिकीर्षति ११. २. १३.

यत्प्राङ्प्रत्यङ् ४३ यत्प्राङ् प्रत्यङ् स्वधया यासि शीभं नानारूपे अहनी कर्षि मायया—यासि, कर्षि १३. २. ३.

४४ यस्माद्वाता ऋतुथा पवन्ते यस्मात्समुद्रा अधि विक्षरन्ति—पवन्ते, विऽक्ष- १३. ३. २.

४५ यो मारयति प्राणयति यस्मात्प्राणन्ति भुवनानि विश्वा—मारयति, प्रा- १३. ३. ३.

४६ यं बल्बजं न्यस्यथ चर्म चोपस्तृणीथन—निऽअस्यथ, उपऽस्तृणीथन १४. २. २२.

मित्रश्चि ४७ मित्रश्चिद्धि ष्मा जुहुराणो देवां छ्लोको न यातामपि वाजो अस्ति—जुहुराणः ?, अस्ति १८. १. ३३. = X. 12. 5.

४८ यस्मिन्देवा विदथे[5] मादयन्ते विवस्वतः सदने धारयन्ते—मादयन्ते, धारयन्ते १८. १. ३५. = X. 12. 7.

४९ यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि—अद्मि, सम्ऽगृणामि ६. ७१. ३; TA. II. 6. 2. 11.

यददैव्य नृणमहं so Vn. ५० यददीव्यन्नृणमहं कृणोम्यदास्यन्नग्न उत संगृणामि—कृणोमि, सम्ऽगृणामि ६. ११९. १; TA. II. 4. 1.

पृणंन्ति प्र च ५१ ये पृणन्ति प्र[6] च यच्छन्ति सर्वदा—पृणन्ति, यच्छन्ति; or यच्छन्ति goes with च; hence accented १८. ४. २९.

14c ॥ इति[7] अवसानेषु चवैवाव्यतानि[7] चवायोगाद्वा ॥

15 ॥ द्विनतिकानि वा, चवायोगे द्वयोर्द्वयोः, पूर्वलुप्तकारणानि कां लुप्तपराणि साकाङ्क्षाणीत्याहुः ॥ १५ ॥

॥ ८ ॥

१ अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः—भवथ १. ४. ४. W. bhavatha.

२ उत वा शक्रो रत्नं दधात्यूर्जया वा यत्सचते हविर्दाः—दधाति ५. १. ७.

अर्द्धमर्द्धेन ३ अर्धमर्धेन[8] पयसा पृणक्ष्यर्धेन शुष्म वर्धसे असुर—पृणक्षि ५. १. ६. W prnaksi

लँ ४ जिह्वा ज्या भवति कुल्मलं[9] वाक्—भवति ५. १८. ८.

५ स्त्रैषूयमन्यत्र[10] दधत्पुमांसमु दधदिह—दधत् ६. ११. ३. straisūyam cited under II 88, IV 83.

६ आ नो गोषु भजता[11] प्रजायां निवात इद्वः शरणे स्याम—भजत ६. ५५. २.

७ पराङिव परावर्ति एष्यत्वर्वाची गौरुपेषतु—एष्यतु ६. ६७. ३.

८ सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु—कृणोतु ६. ८३. १.

1. Vn. ०नुचीः. 2. Vn. प्राङ्न्यङ्क्षया. 3. Vn. वल्वजं. 4. Vn. मित्रश्चिष्माद्धिजुह्व. 5. Vn. दिदथे. 6. Vn. पृचयः. 7. Vn. इत्यवसानेषु च वाक्यदतानि; it seems that the three letters have been crossed, in MS., on revision, but the marks are not clear. 8. Vn. त्यर्द्धेन पयसा. 9. Vn. कुल्मलाँ. 10. Vn. स्त्रेषुय. 11. Vn. भजाता.

९ वाममस्मभ्यं धावतु शर्म तुभ्यम्—धावतु ६. ९२. ३ = X. 56. 2.

१० उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्—जायताम् ६. १०६. १.

útso vā is cited as a counter-example under II 20

११ इयमेवेदं भविष्यतीति[1]—भविष्यति ८. १०. १.

इन्द्रो १२ तस्या इन्द्रो वत्स आसीद्गायत्र्यभिधान्यभ्रमूधः—आसीत् ८. १०. १२.

१३ तस्या विरोचनः प्राह्रादिर्वत्स आसीदयस्पात्रं पात्रम् (आसीत् ८. १०. २२-२९)

इत्यष्टौ ।

१४ आसो बलासो भवतु मूत्रं भवत्वामयत्—भवतु ९. ८. १०.

र्ति १५ ऋतं पिपर्त्यनृतं नि पाति—पिपर्ति ९. १०. २३ = I. 152. 3.

१६ अद एकेन गच्छत्यद एकेन गच्छति—गच्छति ११. ८. ३३.

१७ दिवं च रोह पृथिवीं च[2] रोह राष्ट्रं च रोह द्रविणं[3] च रोह—रोह १३. १. ३४.

१८ प्रजां च रोहामृतं च रोह—रोह १३. १. ३४.

युज्यता १९ ब्रह्मापरं युज्यतां ब्रह्म पूर्वम्—युज्यताम् १४. १. ६४.

परिस्कदा २० तस्य देवजनाः परिष्कन्दा आसन्त्संकल्पाः प्रह्राय्याः—आसन् १५. ३. १०.

अकुर्वनिति २१ वासन्तौ मासौ गोप्तारावकुर्वन्बृहच्च रथन्तरं चानुष्ठातारौ (अकुर्वन् १५. ४. १-६.)

इति षट् ।

ब्रह्म प्राविशतु २२ बृहस्पतिमेव ब्रह्म प्रविशत्विन्द्रं क्षत्रम्—प्रविशतु १५. १०. ४.

Text क्षिन्द्र

२३ बृहच्च रथन्तरं च द्वौ स्तनावास्तां यज्ञायज्ञियं च वामदेव्यं च द्वौ—आस्ताम् ८. १०. १३.

२४ तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे—आस्ताम् ११. ८. २.

२५ तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां शरच्च वर्षाश्च द्वौ—१५. ३. ४.

२६ बृहच्च रथन्तरं चानूच्ये[4] ३ आस्तां यज्ञायज्ञियं च वामदेव्यं च तिरश्च्ये—आस्ताम् १५. ३. ५.

सं २७ सं सोमेन मदस्व सं स्वधाभिः—मदस्व १८. ३. ८.

15b ॥ वा इत्यस्मात् :—

हृति २८ निर्वै क्षत्रं नयति हन्ति वर्चः (नयति ५. १८. ४.)

15c ॥ एकस्मात् :—

२९ प्रजामेका जिन्वत्यूर्जमेका—जिन्वति ८. ९. १३.

एकस्मात् ? ३० अद एकेन गच्छत्यद एकेन गच्छति (गच्छति ११. ८. ३३) इत्येकेष्यस्मात्[5] ?

15d ॥ अन्यस्मात् :—

३१ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति—अत्ति ९. ९. २०.

अभ्यऽन्य ३२ अभ्यऽन्यदेति पर्यन्यदस्यते (एति १३. २. ४३) इत्यन्यदित्यस्मात् ॥

W eti

॥ ९ ॥

1. Vn भवष्यति 2 Vn. चारोह 3. Vn. omits द्र० रोह 4. Vn. अनूच्ये ॥३॥ आस्ता 5. Vn. ०तीत्यकेष्यस्मात्

16 ॥ परकारणानि[1] ॥ १६ ॥

परतः कारणे सति पूर्वमाख्यातं न निहन्यते ।
परुष्परुराविवेशा यो अस्य—आऽविवेश १. १२. ३.
ग्राहिर्जग्राह यद्येतदेनम्—जग्राह ३०. ११. १.
वर्णा हिरण्यवर्णा अतृपं यदा वः—अतृपम् ३. १३. ६. This is cited as a counter-example under II. 44.
मक्षित व्यचति उत्समक्षितं व्यचन्ति ये सदा—विऽअचन्ति ४. २७. २.
उच्चैर्घोषाभ्येति या व्रतम्—अभिऽएति ९. १. ८.
हस्ती मृगाणां सुषदामतिष्ठावान्बभूव हि—बभूव ३. २२. ६.
केवलीन्द्राय दुदुहे हि गृष्टिर्वशं पीयूषं प्रथमं दुहाना—दुदुहे ८. ९. २४.
मन्योर्मनसः शरव्या ३ जायते या—जायते ८. ३. १२.

17 ॥ परयोगीनि[5] ॥ १७ ॥

परेणाख्यातेन योगस्थं न निहन्यते ।
१ राजा चिद्यं भगं भक्षीत्याह—यम् । आह, भक्षि ३. १६. २=VII. 41. 2.
स्वाद्वद्मीति २ अन्नं यो ब्रह्मणां मल्वः स्वाद्व१द्मीति[6] मन्यते—यः । स्वादु । अद्मि । इति ।
मन्यते; अद्मि ५. १८. ७.
३ यो वा रक्षाः शुचिरस्मीत्याह—यः । शुचिः । अस्मि । इति । आह; अस्मि ८. ४. १६=VII. 104. 16.

लिंग 17b ॥ तत्सर्वलिङ्गवचनैर्व्यवेतं[7] भवति युक्तम् । आख्यातं नोदात्तम् । यत्रोदात्तं दृश्यते, सोऽपवादः ॥

४ यस्तानि वेद स पितुष्पितासत्—वेद; असत् २. १. २=VS. 32. 9. pitúḥ pitári II. 73, prescribes satva, but AV. XVIII 2. 49, 3 46, 59 go against this
५ यस्ता विजानात्स पितुष्पितासत्—विऽजानात्; असत् ९. ९. १५.=1. 164. 16.
जिघांसति ६ अमा कृत्वा पाप्मानं यस्तेनान्यं जिघांसति[8]—जिघांसति ४. १८. ३.
यस्तंन्न ७ यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्ते अमी समासते—वेद–करिष्यति;
विदुः–आसते ९. १०. १८=1. 164. 39.
यदङ्ग ८ यदङ्ग स तमुत्खिदेन्नैवाद्य न श्वः स्यात्—उत्ऽखिदेत्; स्यात् ११. ४. २१.
९ यो वै तान्विद्यात्प्रत्यक्षं स वा अद्य महद्वदेत्—विद्यात्; वदेत् ११. ८. ३.
यौ वै तान्वि १० यो[10] वै तां विद्यान्नामथा स मन्येत पुराणवित्—विद्यात्; मन्येत ११. ८. ७. Concordance tān
ये त आसं दश ११ ये[11] त आसन्दश जाता देवा देवेभ्यः पुरा—आसन् ११. ८. १०.
१२ उतो तदद्य विद्याम यतस्तत्परिषिच्यते—परिऽसिच्यते; विद्याम १०. ८. २९.
यत्तच्छरीरमशयत्संधया संहितं महत् ।
१३ येनेदमद्य रोचते को अस्मिन्वर्णमाभरत्—अशयत्, रोचते; आ । अभरत् ११. ८. १६.

1. S. कारणानि. 2. Vn. महि. 3. Vn. पदो. 4. Vn बभूव हिं. 5. Vn. परयागिनी. Ṣ. योगिनि, Vr. योगिति, so is R. 6. Vn. स्वाद्वाद्वद्मीति. 7. Vn. व्यवतं. 8. Vn. जिघंसति. 9. Vn. यौवैनाचि. 10. Vn. यावेतान्. 11. Vn. यत आसन्

१४ ससूव ह्वि तामाहुर्वशेति—आहुः १०. १०. २३.

१५ क्षिप्रं वै तस्य पृच्छन्ति यत्तदासी३दिदं नु ता३दिति—आसीत्; पृच्छन्ति १२. ५. ५०.

हासते १६ ये[2] देवास्तेन हासन्ते सूर्येण मिमते जवम्—हासन्ते; मिमते ४. ३६. ५.

१७ यथा सो अस्य परिधिष्पताति—पताति ५. २९. २.

प्राणति १८ ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा—प्राणन्ति; विदुः १०. १०. ५.

१९ उताशिवनांबभरद्यत्तदासीत्—अभरत्; आसीत् १८. २. ३३=X. 17 2.

यत्र ईयु २० यत्रासते सुकृतो यत्र त ईयुः—आसते; ईयुः १८. २. ५५=X. 17. 4.

॥ १० ॥

18 ॥ अर्थपादादिषूदात्तमाख्यातामन्त्रितं पदम्[3] ॥ १८ ॥

19 ॥ व्याघ्रादीन्यनुदात्तानि पादादीनामपोदितम्[4] ॥ १९ ॥

१ तिष्ठावरे तिष्ठ परे—तिष्ठ १. १७. २.

२ विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन्—विश्वे देवाः। वसवः। रक्षत, जागृत १. ३०. १.

स्योनां ३ अहा अरातिमविदः स्योनम्—अहाः, अविदः २. १०. ७; cp. TB. II. 5. 6. 3. This is a counter-example under II. 46

श्वा ४ स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः।
स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः—स्वप्तु, स्वपन्तु ४. ५. ६=VII. 55. 5.

५ दुहे सायं दुहे प्रातर्दुहे मध्यंदिनं परि—दुहे ४. ११. १२.

य ६ सीदन्तु गोष्ठे रणयन्त्वस्मे—सीदन्तु, रणयन्तु ४. २१. १२=VI. 28. 1.

७ मन्वे वां मित्रावरुणावृतावृधौ सचेतसौ द्रुह्वणो यौ नुदेथे—नुदेथे ४. २९. १२.

८ प्र सत्यावानमवथो भरेषु—अवथः+यत् ४. २९. १.
प्र सत्यावानमवथो भरेषु—४. २९. २.

९ तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व—स्वदय ५. १२. २= X. 110. 2. W. svadayā.

पातु १० पातं न इन्द्रापूषणादितिः पान्तु मरुतः—पान्तु ६. ३. १.

११ पातां नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः—पातु ६. ३. २.

१२ पातु नो देवी सुभगा सरस्वती पात्वग्निः—पातु ६. ३. २.

पांतु १३ अंशो भगो वरुणो मित्रो अर्यमादितिः पान्तु मरुतः—पान्तु ६. ४. २.

वांछ मे तन्वं १ वाछाक्षौ १४ वाञ्छ मे तन्वं१ पादौ वाञ्छाक्ष्यौ२ वाञ्छ सक्थ्यौ—वाञ्छ ६. ९. १.

1. Vn. यत्ततासी. 2. Vn. येन देवास्तेन. 3 Vb. माख्यातमामन्त्रितपदम्, V. माख्यातमामन्त्रित, P. अथर्वपदादिषूदात्तमाख्यात-ामन्त्रितपदम्; Vr. अर्थपदादिषू। दात्तमाख्यातमामन्त्रित, Al अथपादादिषूदात्तमाख्यातमामत्रित, अर्थपादादिषु वर्तमान आख्यात आमत्रित च पदं उदात्त ावति on the margin. 4. पादादौ आमत्रितानि व्याघ्रादिपदानि अनुदात्तानि भवति। व्याघ्र जभयामसीत्यादीनि on the margin. Vn. विंशतिः, Ṣ. puts fullstop after अनुदात्तानि, V दीन्मनु, V., Vr, R., P पदा.

अस्थाद्यौ १५ अस्थाद् द्यौरस्थात्पृथिव्यस्थाद्विश्वमिदं जगत्—अस्थात् ६. ४४. १.

१६ तर्दे है पतंग है जभ्यं हा उपक्वस—तर्दे, पतंग, जभ्य, उपक्वस ६. ५०. २. C apak—

१७ ब्रह्मेवासंस्थितम् ६. ५०. २.

त्रायतांनः १८ परि दध्म इन्द्रस्य बाहू समन्तं त्रातुस्त्रायतां नः—त्रायताम् ६. ९९. ३.

१९ देव सवितः सोम राजन्—देव, सोम ६. ९९. ३.

दृंह २० दृंह प्रत्नां जनयाजातान्—दृंह, जनय ६. १३६. २. dṛ́mha pratnā́n is cited as an example under I 71, which says that of the ṛ vowels, the part following the r receives the nasal quality

२१ पिबात्सोमं ममदंदेनमिष्टे—पिबात्, ममदत् ७. १४. ४.

२२ इदं राष्ट्रं पिपृहि सौभगाय विश्वं एनमनु मदन्तु देवा·—पिपृहि ७. ३५. १.

२३ शृणोतु न· सुभगा बोधतु त्मना—शृणोतु, वोधतु ७. ४८. १. = II. 32. 4.

२४ ऊर्ज एहि स्वध एहि सूनृत एहीरावत्येहीति—ऊर्जे । स्वधे । सूनृते । इरा॑ऽवति ८. १०. ११.

२५ तामसुरा उपाह्वयन्त माय एहीति—माये । आ । इहि ८. १०. २२.

२६ तां पितर उपाह्वयन्त स्वध एहीति—स्वधे ८. १०. २३.

२७ तां मनुष्या ३ उपाह्वयन्तेरावत्येहीति—इरा॑ऽवति । आ । इहि ८. १०. २४.

ब २८ तां सप्तऋषय उपाह्वयन्त ब्रह्मण्वत्येहीति—ब्रह्मण्ऽवति ८. १०. २५.

२९ तां देवा उपाह्वयन्तोर्ज एहीति—ऊर्जे ८. १०. २६.

गध ३० तां गन्धर्वाप्सरस उपाह्वयन्त पुण्यगन्ध एहीति—पुण्यऽगन्धे ८. १०. २७.

३१ तामितरजना उपाह्वयन्त तिरोध एहीति—तिरःऽधे ८. १०. २८.

३२ तां सर्पा उपाह्वयन्त विषवत्येहीति—विषऽवति ८. १०. २९.

३३ स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्य क्वावात्सीर्व्रात्योदकं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते निकामस्तथास्त्विति (व्रात्य १५. ११. २–१०) इति द्वादश ।

३४ रक्षतु त्वा द्यौ रक्षतु पृथिवी—रक्षतु ८. १. १२.

३५ सं वित्स्वाङ्गैर्वद जिह्वयालपन्—वद ८. २. ३.

हति ३६ हन्ति रक्षो हन्त्यासद्वदन्तम्—हन्ति । असत् = "असत्यम्" ८. ४. १३ = VII. 104. 13.

३७ त्रीन्घर्मानभि वावशाना मिमाति माथुं पयते पयोभिः—मिमाति, पयते ९. १. ८.

वयं ३८ जघानेन्द्रो जघ्निमा वयम्—जघ्निम १०. ४. १२.

अन्त ३९ रोचसे दिवि रोचसे अन्तरिक्षे पतंग पृथिव्यां रोचसे रोचसे अप्स्वन्तः—रोचसे १३. २. ३०.

अजैष्म द्या ४० अजैष्माद्यासनामाद्याभूमानागसो वयम्—अजैष्म । अद्य । असनाम (√सन्) अद्य । अभूम १६. ६. १. = VIII. 47. 18.

1. Vn. जम्यहा. 2. Vn. पिवातसो. 3. Vn. वाधन्तु. 4. Vn. रावत्यहि. 5. Vn. भाय. 6. Vn. मिनि मायुं यतते ययोभि·.

स×पु-with upadhmānīya. ४१ सदासि रण्वो यवसेव पुष्यते[1] होत्राभिरग्ने मनुषः स्वध्वरः—पुष्यते १८. १. २२ = X. 11. 5.

वह्निः स्वप ४२ विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती—विवक्ति, सुऽअ-पस्यते, तविष्यते, वेपते १८. १. २३ = X. 11. 6.

वन् ४३ इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् (भूषति १८. १. २४ = X. 11. 7) इति। W. bhūsati

20 ॥ वाक्यविपर्यये पदलोपेषु[2] पादादिवत्स्वरः[3] ॥ २० ॥

मोघ योमा मोघं यातुधानेत्याह—आह ८. ४. १५ = VII. 104. 15

On the mar यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह—असि। इति। आह ८. ४. १६ = VII. 104. 16.

अजो१स्यज अजो३स्यज स्वर्गोऽसि—अजः। असि। अज। स्वःऽगः। असि; अज ९. ५. १६. Text स्वर्गोऽसि

जामान्दा स नः पतिभ्यो जायां दा अग्ने प्रजया सह (जायाम्। दाः। अग्ने १४. २. १ = X. 85. 38) इति। W agne

॥ ११ ॥

घात. 21 ॥ चयोगादनिघातः[4] ॥ २१ ॥

१ कनिष्ठिका[5] च तिष्ठति[5]—तिष्ठति १. १७. २.

२ सं चेध्यस्वाग्ने[6] प्र च वर्धयेमम्—इध्यस्व २. ६. २; so TS. 4. 1. 7. 1.

३ शतं च जीव शरदः पुरूचीः—जीव २. १३. ३.

४ सं चेन्नयाथो अश्विना कामिना सं च वक्षथः[7]—नयाथः २. ३०. २.

श्चेंद्र ५ स्त्रियश्च सर्वाः स्वापय शुनश्चेन्द्रसखा चरन्—स्वापय ४. ५. २.

जातूंश्च सर्वा ६ यातूंश्च सर्वा जम्भयत्सर्वाश्च यातुधान्यः—जम्भयत् ४. ९. ९.

सर्वन्नाशय ७ यक्ष्मं च सर्वं नाशय[8] तक्मानं चारसं कृधि—नाशय ५. ४. ९.

८ आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः—वह ५. १२. १. = X. 110. 1.

क्रमि ९ दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम्—हन्यताम् ५. २३. ७.

वसव १० वसवश्चातिष्ठन्वसुधातरश्च—अतिष्ठन् ५. २७. ६.

कृण्वन् ११ भिन्दन्त्सपत्नानधरांश्च कृण्वदा मा रोह महते सौभगाय—कृण्वत् ५. २८. १४. Text sahaté a misprint

सर्वन्नो १२ द्विपाच्च सर्वं नो रक्ष चतुष्पाद्यच्च नः स्वम्—६. १०७. १-४. T सर्वं

विप्राय १३ स्वां[9] चाग्ने तन्वं[10] पिप्रायस्वास्मभ्यं च सौभगमा यजस्व ६. ११०. १ = VIII. 11. 10 -prá- W. pipráyasva

1. Vn तिग्युते हो०. 2. P. पदलोपेषु 3. S पदादिव, V. पादादीवत् 4. P. reverses the order of 21—22; Vr. चायोगा. 5 Vn. ष्ठिका, तिष्ठति. 6. Vn ध्यस्ताम. 7. Vn. स च वक्षथः. 8. सर्वन्नाशय. 9. Vn. श्वा 10. Vn. तन्नं.

१४ तिसृभिश्च वहसे त्रिंशता च—७. ४. १=VS. 27. 33.
१५ प्र चानति वि च चष्टे शचीभिः—प्र। च। अनति ७. २५. २.
१६ यथा शेपो अपायातै स्त्रीषु चासदनावयाः—च। असत् ७. ९०. ३.
१७ रक्षतु त्वा द्यौ रक्षतु पृथिवी सूर्यश्च त्वा रक्षतां चन्द्रमाश्च—रक्षतु ८. १. १२. W. raksatām
१८ न च प्रत्याहन्यान्मनसा त्वा प्रत्याहन्मीति प्रत्याहन्यात्—८. १०. ३१.
पचौ १९ पञ्चौदनं च तावजं ददातः—९. ५. २७.
२० अजं च पचत पञ्च चौदनान्—९. ५. ३७.
पराञ्च २१ पराञ्चं चैनं प्राशीः प्राणास्त्वा हास्यन्तीत्येनमाह (११. ३. २८–२९; ३२–४९) इत्येवमादीनि।
२२ न च प्राणं[1] रुणद्धि सर्वज्यानिं[2] जीयते—११. ३. ५५.
२३ न च सर्वज्यानिं[3] जीयते पुरैनं जरसः प्राणो जहाति—११. ३. ५६.
२४ दिवं च यन्ति[4] पृथिवीं च लोकान्—१२. ३. २५.
२५ ददामीत्येव ब्रूयादनु चैनामभुत्सत[5]—१२. ४. १.
२६ हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति—१२. ४. १३, १९.
याचितामथैनांन्नि २७ ब्राह्मणैश्च याचितामथैनां[6] निप्रियायते—१२. ४. २५. T náś ca
२८ वशां च विद्यान्नारद ब्राह्मणास्तर्ह्येष्याः १२. ४. १६.
२९ यो वेहतं मन्यमानो ऽमा च पचते वशाम्—१२. ४. ३८.
३० यश्च गां पदा स्फुरति प्रत्यङ् सूर्यं च मेहति—१३. १. ५६.
सृजे जुहु सृजेन्न ३१ स चातिसृजेज्जुहुयान्न चातिसृजेन्न जुहुयात्—१५. १२. ३.
३२ कर्षेदेनं न चैनं कर्षेत्—१५. १३. ७.
३३ दिवं च गच्छ पृथिवीं च धर्मभिः—१८. २. ७. W gacha
द्विषंश्च ३४ द्विषंश्च मह्यं रध्यतु मा चाहं द्विषते रधम्—१७. १. ६. T dvisan accentless

22 ॥ वायोगादनिघातः[7] ॥ २२ ॥

१ अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे—८. ४. ९=VII 104 9.
मोघ २ यदि वाहमनृतदेवो अस्मि मोघं[8] वा देवाँ अप्यूहे[10] अग्ने—अपिऽऊहे ८. ४. १४= VII. 104. 14.
त्रैष्टुभं, भान्नि ३ यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभं वा त्रैष्टुभान्निरतक्षत[11]—९. १०. १=I. 164. 23.
४ अग्नौ वा त्वां[12] गार्हपत्येऽभिचेरुः—१०. १. १८.
वां त्व मन ५ तस्यं वा त्वं मन इच्छा स वा तव—१८. १. १६=X. 10. 14.

॥ १२ ॥

1. Vn. प्राणँ. 2 Vn. ज्यानि. 3. Vn. ज्यानि. 4 Vn यन्ति. 5. Vn. चैनामत्सत. 6. Vn. मथैनान्निप्रि. 7. Vn. न्निजेजुहुयान्नचातिस 8. Al. omits sūtras 22-25. 9 Vn. मोघं. 10. Vn. अप्यहे. 11 Vn. त्रैष्टुभां विर. 12. Vn. वा चा गा.

आद्युदात्तादामंत्रितात्परं on the margin

23a ॥ आमन्त्रितादाद्युदात्तादाख्यातं न निहन्यते[1] ॥ २३ ॥[2]

23b ॥ न गावो भवथादीनाम्[3] ॥

23c ॥ अनुदात्तान्मृडतादीनि ॥

१ [अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः १. ४. ४.] — T. bhavatha; VS 9 6, MS 1 11 1 161 12, SB 5 1 4 6 ta

२ अस्मिन्यज्ञे मरुतो मृडता नः—१. २०. १.

३ विश्वे देवा वसवो रक्षतेममुतादित्या[4] जागृत यूयमस्मिन्—१. ३०. १.

४ इदं जनासो विदथं महद् ब्रह्म वदिष्यति—१. ३२. १.

५ उप त्वा नमसा वयं होतर्वैश्वानरं[5] स्तुमः—३. १५. ७.

वर्द्धय — ६ अपां नपादभिहुती गयस्य चिद् देवं त्वष्टर्वर्धय सर्वतातये—६. ३. ३. — C abhihvrtī

७ यद्द्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वन्नवृणीमहीह[6]—७. ९७. १ = III. 29. 16.

त्वं — ८ येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि—१३. २. २१ = 1. 50. 6.

तमृछ याहि — ९ यमस्य यो मनवते सुमन्त्वग्ने तमृष्वं पाह्यप्रयुछन्[7]—१८. १. ३४ = X. 12. 6.

24 ॥ लुप्तकरणान्यकरणानि वा[8] ॥ २४ ॥[9]

विड्ढी — १ आ त्वा विशन्तु सुतास इन्द्र पृणस्व कुक्षी विड्ढि शक्र धियेह्या नः—२. ५. ४.

२ श्रुधी हवं गिरो मे जुषस्वेन्द्र स्वयुग्भिर्मत्स्वेह[10] महे रणाय—मत्स्व । इह २. ५. ४.

पाह्यस्मान् — ३ बृहस्पतये महिष द्युमन्नमो विश्वकर्मन्नमस्ते[11] पाह्य१स्मान्—२. ३५. ४. TS. III. 2. 8. 2.

जुहुत — ४ अन्तर्दावे जुहुता स्वे३तद् यातुधानक्षयणं घृतेन—६. ३२. १. — W, SPP. juhutā

मदति — ५ दुह्रन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति वेधसः—७. ७३. २.

६ इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः—८. ४. १ = VII. 104. 1.

विक्ष्वीछत — ७ वि तिष्ठध्वं मरुतो विक्ष्वि१छत[12] गृभायत रक्षसः सं पिनष्टन—८. ४. १८ = VII. 104. 18. — viksú cited as an example under virāme ca IV. 34, which negatives division in the Pada, where conversion into a lingual takes place.

खादंति — य आमं मांसमदन्ति पौरुषेयं च ये क्रविः ।

८ गर्भान्खादन्ति केशवास्तानितो नाशयामसि—८. ६. २३.

९ अपरिमितमेव यज्ञमाप्नोति—९. ५. २२.

समिंधे — १० घृतेन त्वां मनुरद्या समिन्धे—७. ८२. ६. — W., SPP sám indhe

११ अद्या मुरीय यदि यातुधानो अस्मि—८. ४. १५. — W , SPP murīya

१२ देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान—९. १०. ९ = X. 55. 5. — samānah MS 4 9. 12 133 11

1. Vn. आमन्तिता 2 Vn. gives it in the form of a verse, आमन्त्रितादाद्युदात्तादाख्यात न निहन्यते. 3. Vn. न गावो भवथादीन्यनुदात्तान्मृ 4. Vn. हनादित्या. 5. Vn. चेश्वानरस्तुमः. 6 Vn चिकित्वान्नवृ०. 7. Vn. त्वमृछ याहि. 8. Vn. लुप्तकारणान्यकार०; so. P. R. V. Vr, M. लुप्तकाणान्यकार०; S. ०कारणा न्यकारिणानि ना 9. Vn लुप्तकरणान्यकरणानि च आख्यातानि वा निहन्यंते on the margin. 10. Vn महत्स्वेह. 11 Vn. विश्वकर्मान्नमस्ते. 12. Vn. विक्ष्वछन.

अर्द्धेन १३ अर्धेन विश्वं भुवनं जजान यदस्यार्धं क्व१ तद्बभूव—१०. ८. ७; ११. ४. २२.

१४ अयातमस्य ददृशे[1] न यातम्—१०. ८. ८.

१५ स्वधां पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्त्सृजामि—१२. २. ३२, ५५. T. -nā

परशु १६ प्र यच्छ पर्शुं त्वरया हरौषम्—त्वरय । आ । हर १२. ३. ३१.

शुभंत १७ शुद्धाः सतीस्ता उ शुम्भन्त[2] एव—१२. ३. २६.

यो अस्याः कर्णावास्कुनोत्या स देवेषु वृश्चते ।

इति मन्यते १८ लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ॥ यः मन्यते—१२. ४. ६.

१९ वाचस्पते सौमनसं मनश्च गोष्ठे नो गा जनय योनिषु प्रजाः—१३. १. १९.

यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः ।

*२० सं बाहुभ्यां[3] भरति सं पतत्रैः—१३. २. २६; MS 2. 10. 2· 133. 8.

हन्यते २१ मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते—१४. १. १३. W hanyante, so RV X.85.13,

पर्था २२ प्र पितृयाणं पन्थां जानाति प्र देवयानम्—१५. १२. ५.

न पितृयान पथा २३ न पितृयाणं पन्थां जानाति न देवयानम् (१५. १२. ९.) इति व्रात्ये । W. jānāti

जाना down on the margin २४ प्रास्मदेनो वहन्तु प्र दुष्वप्न्यं वहन्तु—१६. १. ११. W vahantu

२५ सूर्ये ज्योतिरदधुर्मास्य१क्तून्—१८. १. ३५=X. 12 7.

२६ सूर्यं चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः—१८. २. ७= X. 16. 3. W. gacha

२७ ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते—१८. २. ३५=X. 15. 14.

25 ॥ अन्ययोगेऽनिघातः[4] ॥ २५ ॥

अन्ययोगे आक्षात न निहन्यते on the margin

१ विश्वमन्यामभीवार तदन्यस्यामधि श्रितम्—१. ३२. ४.

न्यान्स्वा २ ओत्सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहम्—४. ५. ७.

३ दक्षं ते अन्य आवातु व्य१न्यो वातु यद्रपः—४. १३. २. RV. X. 137.2 ā vātu

४ अन्याः समनमायति—आऽअयति ६. ६०. २.

प्रान्यान्सपत्नान्स ५ प्रान्यान्त्सपत्नान्त्सहसा सहस्व प्रत्यजातां जातवेदो नुदस्व—७. ३५. १.

थान्य विंदते ६ या पूर्वं पतिं वित्त्वाथान्यं[5] विन्दतेऽपरम्—९. ५. २७.

न्यान्य ७ ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं[6] चिक्युर्न नि चिक्युरन्यम्—९. १०. १६. =1. 164. 38.

८ विश्वमन्यो अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम्—९. १०. २६= 1. 164. 44.

ततुस्ति ९ प्रान्या तन्तूंस्तिरते[8] धत्ते अन्या नाप वृञ्जाते न गमातो अन्तम्—१०. ७. ४२.

1. Vn. ददाश. 2. Vn. शुभंत. 3. Vn. बाहुभ्या मरति. 4. Vb, N, J and all other mss. अन्ययोगाद. 5. Vn. मान्यान्स. 6. Vn. अयान्यैं विंदते. 7. Vn. न्यान्य. 8. Vn. ततुँ स्थिरत धत्त.

१० विश्वान्यो[1] भुवना विचष्टे हैरण्यैरन्यं हरितो वहन्ति—७. ८१. १; १३. २. १२; १४. १. २३.

अभ्यन्यदेति ११ अभ्य१न्यदेति[2] पर्यन्यदस्यतेऽहोरात्राभ्यां महिषः कल्पमानः—१३. २. ४३. W. eti and so SPP

बृहदन्यत. १२ बृहदन्यतः पक्ष आसीदपिथंतरमन्यत. सबले सध्रीची—१३. ३. १२.

अन्येषां विदते १३ यस्मिन्वीरो न रिष्यत्यन्येषां[3] विन्दते वसु—१४. २. ८; Apmb. 1. 6. 11.

26 ॥ नहीत्यनेन युक्तानि[4] ॥ २६ ॥

नहि ते नाम जग्राह—३. १८. ३.

नहि ते अग्ने तन्वः क्रूरमानंश मर्त्यः—६. ४९. १.

नहि तद् दृश्यते[5] दिवा—७. १०१. १; ApŚ. 10. 13 11

27 ॥ यदित्येतेन समस्तेन[6] ॥ २७ ॥

षिंचा यत्काम इदमभिषिञ्चामि वोऽहम्—६. १२२. ५; १०. ९. २७; ११. १. २७.

यत्कामास्ते जुहुमस्तन्नो अस्तु—७. ४९. ४ = X. 121. 10.

न वि जानामि यदिवेदमस्मि—यत्ऽइव । इदम् । अस्मि ९. १०. १५ = 1. 164. 37.

27b ॥ इदित्यस्मात् :—

ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्चन—मम । इत् । असः ७. ३८. ४.

न निहन्यन्ते on the margin

27c ॥ अहेत्यस्मात् :—

ममेदह क्रतावसः—मम । इत् । अह । क्रतौ । असः १. ३४. २.

अहं वदामि नेत्त्वं सभायामह त्वं वद—७. ३८. ४.

28 ॥ वचनात्परेण[7] च सर्वत्र युक्तं वापवादो[8] वा लुप्तं वा तत्पदं[9] येन योगः ॥ २८ ॥

अंन्त १ विद्म ते धाम परमं गुहा यत्[10] समुद्रे अन्तर्निहितासि नाभिः—१. १३

२ इहैतु सर्वो यः पशुरस्मिन्तिष्ठतु[11] या रयिः—१. १५. २.

वर्षं ३ इतश्च यदमुतश्च यद्वधं वरुण यावय[12]—१. २०. ३.

उग्रा हित्काण्व ४ उग्रा हि कण्वजंभनी तामभक्षि[13] सहस्वतीम्—२. २५. १.

1. Vn विश्वन्या विचष्टे. 2. Vn अभ्यन्यदति. 3 Vn. अन्यर्षं 4. Vn. योगेन हि युक्तानि नहि युक्तानि च आक्षातानि न निहन्यते। उग्रा हि कण्वजभनी (२. २५. १), तेषा हि धाम (७ ७. १), सरथ हि भूत्वा (६. २. ६.), स हि दिवः (४. १. ४.), ददिर्हि (५. १३. १); प्रत्नो हि कम् (६. ११०. १), द्याव प्रियों (१८. ४. ६१) इत्येवमादीनि on the mar. 5. Vn. तद्दृश्यते हि वा. 6. यत् इत् युक्तानि आक्षातानि न निहन्यते on the mar. 7. Vn. G, N, M read वचनपरेण च; B वचनान्परेण, Al वचनात्परेण. 8. Vn P. चापवादो, S. puts virāma after लुप्त वा. 9 Vn, J, N, M number sūtras 28; other mss. put down n. 1; V reads लुप्त वा तत्पदे ॥ येन योगः. 10. Vn. यसमुद्रे. 11 Vn. अस्मि ति. 12. Vn. यद्वर्षं वरुण्यावय. 13. V. तामतक्षि.

५ नेछत्रुः प्राशं जयाति सहमानाभिभूरसि—२. २७. १.

६ यवान्नेददानपि नह्यतं मुखम्[1]—न । इत् । अदान् ६. ५०. १. — yávān néd ádān cited under IV 107

वृश्चामि ७ श्रणाम्र्यस्य पृष्टीरपि वृश्चामि यच्छिरः—२. ३२. २.

पितृयानाश्च ८ ये देवयानाः पितृयाणाश्च लोकाः सर्वान्पथो[3] अनृणा आ क्षियेम—६. ११७. ३; TB. III. 7. 9. 8. — pitr-kāh cited as an example under avagrahād ṛkārāt III 85, which prescribes cerebralisation

९ यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम (४. २. २–५ = X. 121. 2.) इति चतुरेषूत्तरार्धेषु ।

१० प्र यदेते प्रतरं पूर्व्यं गुः सदःसद आतिष्ठन्तो अजुर्यम्—५. १. ४. — W and SPP gúh

तेषां, नैना नमसा ११ तेषां[4] हि धाम गभिषक्समुद्रियं नैनान्नमसा[5] परो अस्ति कश्चन—७. ७. १. — naínān námasā cited as a counter-ex under nakārasya catatavargesv anūsmaparesu visarjanīyah II.26

१२ परिसृष्टं धारयतु यद्धितं मावं पादि तत्[6]—८. ६. २०.

जीवनं १३ तया सपत्नान्परि वृङ्ग्धि ये मम पर्येनान्प्राणः पशवो जीवनं वृणक्तु—९. २. ५. — páry enān counter-ex under praparābhyām enah III 80

सरथं १४ इन्द्राग्नी काम सरथं हि भूत्वा नीचैः सपत्नान्मम पादयाथः—९. २. ९.

यावतः १५ सर्वान्त्समागा अभिजित्य लोकान् यावन्तः कामाः समतीतृपस्तान्—१२. ३. ३६.

इत्तद्विदु १६ य इत्तद्विदुस्ते अमृतत्वमानशुः—९. १०. १, १८ = I. 164. 23.

१७ यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत—१८. १. २१ = X. 11. 4.

१८ स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी—१८. १. ३२ = X. 12. 3.

१९ सं धान्यस्य या स्फातिः संस्राव्येण हविषा जुहोमि—२. २६. ३.

२० स हि दिवः स पृथिव्या ऋतस्था मही क्षेमं रोदसी अस्कभायत्—४. १. ४. — W áskabhāyat

२१ ददिर्हि मह्यं वरुणो दिवः कविर्वचोभिरुग्रैर्नि रिणामि ते विषम्—५. ११. १.

२२ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि—६. ११०. १ = VIII.11.10. — W sátsi

दत्तं न २३ उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनु[7] दत्तं न एतत्—६. ११८. २; MS. 4. 14. 7: 245. 13.

नुदन्तु २४ यत्रास्थ्रृत्तत्त्वो ३ यश्च वासस आपो नुदन्तु निर्ऋतिं पराचैः—६. १२४. २ = Apmb. 2 22. 11.

श्वा प्रियं अधू २५ अपूपमीमदन्त ह्यव[8] प्रियाँ अधूषत (१८. ४. ६१) इत्येवमादीनि ।

॥ १४ ॥

आमंत्रि 28b ॥ आमन्त्रितादाद्युदात्तात् परमामन्त्रितं पदम् ।
आद्युदात्तं तदप्याहुः[9] समानाधिकरणं तु वा ॥

१ आज्यस्य परमेष्ठिं जातवेदस्तनूवशिन्[10]—१. ७. २.

असिक्नि २ नक्तंजातास्योषधे रामे कृष्णे असिक्नि च—१. २३. १.

३ यूयं नः प्रवतो नपान्मरुतः सूर्यत्वचसः—१. २६. ३.

---

1. Vn. नक्षत्रुः 2. Vn. मुखँ. 3. Vn. सर्वान्यथा. 4 Vn तेषं हि. 5. Vn. नैना तपसा. 6. Vn. धारयन्न. 7. Vn. यदक्षमत्तमनु. 8. Vn. श्वा प्रियँ. 9. Vn. तदथाहुः. 10. Vn वसिन्रामकृस्य.

No visargas in सोम्याम्　४ अङ्गिरसः पितरः सोम्यासः—२. १२. ५.

५ शेरभक[1] शेरभ पुनर्वो यन्तु यातवः—२. २४. १.

६ शेवृधक शेवृध पुनर्वो यन्तु यातवः—२. २४. २.

७ म्रोकानुम्रोक पुनर्वो यन्तु यातवः—२. २४. ३.

८ सर्पानुसर्प पुनर्वो यन्तु यातवः—२. २४. ४. } इति चतसृषु ।

शिखण्ड　९ रुद्र जलाषभेषज नीलशिखण्ड[2] कर्मकृत्—२. २७. ६.

इंद्र　१० इन्द्रपुत्रे सोमपुत्रे दुहितासि प्रजापतेः—३. १०. १३.

११ भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः—३. १६. ३ = VII. 41. 3.

पर्णे　१२ उत्तानपर्णे सुभगे देवजूते सहस्वति—३. १८. २.

र्व्ये　१३ अवसृष्टा परा पत शरव्ये[3] ब्रह्मसंशिते—३. १९. ८.

गंधर्वा.　१४ जाया इद्वो अप्सरसो गन्धर्वाः पतयो यूयम्—४. ३७. १२.

वर्णे　१५ हिरण्यवर्णे सुभगे सूर्यवर्णे वपुष्टमे—५. ५. ६.

वर्णे　१६ हिरण्यवर्णे सुभगे शुष्मे लोमशवक्षणे—५. ५. ७.

आयु' कृदायु. ष्पत्नी वंतौ　१७ आयुष्कृदायुष्पत्नी[4] स्वधावन्तौ गोपा मे स्तं गोपायतं मा—५. ९. ८.

१८ कैरात पृश्न उपतृण्य बभ्र[5] आ मे शृणुत—५. १३. ५.

१९ ऋतजात ऋतावरि मधु मे मधुला करः—५. १५. ११.

२० तक्मन् व्याल वि गद—५. २२. ६.

द्यौष्पित　२१ द्यौष्पितर्यावय दुच्छुना या—६. ४. ३.

अनावयो　२२ आवयो[6] अनावयो रसस्त उग्र आवयो—६. १६. १.

२३ बृहत्पलाशे[7] सुभगे वर्षवृद्ध ऋतावरि—६. ३०. ३.

जभा　२४ तदापते वघापते तृष्टजम्भा आ शृणोत मे—६. ५०. ३.

राष्ट्रभृत्　२५ उग्रंपश्ये राष्ट्रभृत्—६. ११८. २.

२६ देवपत्नी अप्सरसावधीतम्—६. ११८. ३.

सधस्था　२७ देवाः सधस्था विद लोकमत्र—६. १२३. २.

२८ देवाः पितरः पितरो देवाः—६. १२३. ३.

२९ बभ्रु कल्याणि सं नुद—६. १३९. ३.

३० बृहस्पते सवितर्वर्धयैनम्—७. १६. १.

३१ सिनीवालि पृथुष्टुके या देवानामसि स्वसा—७. ४६. १.

वन्दने　३२ तृष्टिके तृष्टवन्दन उदमूं छिन्धि तृष्टिके—७. ११३. १.

३३ विजावति प्रजावति वि ते पाशांश्चृतामसि—९. ३. १३.

३४ भूतपती पशुपती नमो वाम्—११. २. १.

देवजनाः　३५ उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम्—११. ९. २.

इतरजना　३६ सर्पा इतरजना रक्षांस्यमित्राननु धावत (११. १०. १) उत्तिष्ठतेत्यस्याम् ।

1. Vn repeats शेरभक शेरभक. 2. Vn शिखंड. 3. Vn. शरव्य. 4. omitted in Vn. 5. Vn. बभ्र. 6. Vn. आवयो अनावयो. 7. Vn. बृहत्पलाशस्थाविदलासुभगे

३७ विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव—१८. ३. १६.

सुशंशास ३८ सुशंसासः पितरो मृडता नः—१८. ३. १६.

३९ तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व—५. १२. २. T svadayā

रनाद्‌घो ४० रेवतीरनाधृषः सिषासवः सिषासथ—६. २१. ३.

४१ अपचितः प्र पतत—६. ८३. १.

जित्राय ४२ विश्वजित्त्रायमाणायै मा परि देहि—६. १०७. १.

४३ विश्वजिद् द्विपाच्च सर्वं नो रक्ष—६. १०७. २.

४४ विश्वजित्कल्याण्यै मा परि देहि—६. १०७. ३.

४५ कल्याणि द्विपाच्च सर्वं नो रक्ष—६. १०७. ३.

४६ कल्याणि सर्वविदे मा परि देहि—६. १०७. ४.

विद्वि ४७ सर्वविद् द्विपाच्च सर्वं नो रक्ष—६. १०७. ४.

४८ अक्षाः फलवतीं द्युवं दत्त गां क्षीरिणीमिव—७. ५०. ९.

असौ ४९ असौ हा इह ते मनः—असौ । है १८. ४. ६६. W asaú

५० बृहस्पते वशे लब्ध्वाग्नीषोमा वि विध्यतम्—१. ८. २.

५१ अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम्—१८. २. ५३.

५२ अश्विना ब्रह्मणा यातम्—५. २६. १२.

५३ अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती—६. ६९. २; ९. १. १९.

५४ येन महानघ्न्या जघनमश्विना येन वा सुरा १४. १. ३६.

द्यावापृथिवी अनु मारभध्वम् विश्वे-देवासः ५५ द्यावापृथिवी अनु मा दीधीथां[4] विश्वेदेवासो अनु मा[5] रभध्वम्—२. १२. ५.

५६ द्यावापृथिवी उपश्रुत्या मा पातं स्वाहा—२. १६. २.

५७ द्यावापृथिवी भवतं मे स्योने—४. २६. २–६.

५८ इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति[6]—५. १४. १२.

५९ द्यावाभूमी शृणुतं रोदसी मे—१८. १. ३१.

६० मित्रावरुणा[7] जमदग्निमत्रिम्—४. २९. ३.

[मित्रावरुणा पुरुमीढमत्रिम्—४. २९. ४]

६१ मित्रावरुणावुशनां काव्यं यौ—४. २९. ६.

६२ इन्द्राग्नी मित्रावरुणावधरे पद्यन्तामप्रतिमन्यूयमानाः—१३. १. ३१.

आमन्त्रिततुल्यवृत्ति-स्वर आहुः वि

28c ॥ आमन्त्रिततुल्यवृत्ति स्वर[8] आहुर्विशेषणम् ।
आमन्त्रिताच्च तत्पूर्वं परं छन्दसि दृश्यते ॥

१ प्रवतो नपात् — प्रवतो नपान्नम एवास्तु तुभ्यम्—१. १३. ३.

२ तनूनपात् — तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व—५. १२. २. W svadayā

अपान्नपात्सिन्धवः ३ अपां नपात् — अपां नपात्सिन्धवः सप्त पातन—६. ३. १. Text पातन a misprint

1. Vn. रनाद्दृषः. 2. Vn. जित्त्वाय. 3. Vn. माम. 4 Vn. दीधीथीथा. 5. Vn. मरभध्व. 6. Vn. त प्रति प्रति. 7. Vn. ०वरुण. 8. Vn. आमंत्रिततुल्यवृत्तिः स्वर.

४ अपां नपात् अपां नपादभिहुती गयस्य चित्—६. ३. ३.

अपांनपान्मधु ५ अपां नपात् अपां नपान्मधुमतीरपो दाः—१४. १. ३७.

॥ १५ ॥

28d ॥ आद्युदात्तानि । समानशब्दान्यन्यस्वराणि । अर्थप्रत्ययकृतः स्वरविशेषः । अपवादः क्वचित् । क्वचिद्विभाषितानि ॥

१ ज्येष्ठं यतः तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः—५. २. १=X. 120. 1.

२ रुशती सा पशून् क्षिणाति रिफती रुशती—३. २८. १; १४. १. २७.

रुशत. ३ रुशन्तः ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः ४. १६. ६. C rusantaḥ

४ दासमार्यम् साह्याम दासमार्यं त्वया युजा वयम् ४. ३२. १ = X. 83. 1.

५ यो बिभर्ति यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः १. ३५. २=RVKh. X. 128. 8.

अभ्रिये दिद्युन्नक्षत्रिये ६ अभ्रिये दिद्युन्नक्षत्रिये अभ्रिये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे—२. २. ४.

७ यथा जीवाः यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः—२. २८. ४.

८ हिमाः यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः—२. २८. ४; १२. २. २८.

समाः ९ क्षिमाः कुसूला ये च कुक्षिलाः ककुभाः करुमाः स्रिमाः ८. ६. १०.

संवत्सरान्मा १० समाः समाः संवत्सरान्मासान्भूतस्य पतये यजे—१. ६. १; ३. १०. ९; ११. ६. १७.

धेनुका ११ धेनुका तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव—३. २३. ४. taís tvám cited as a counter-ex. under yusmadādeśe taís-tvam ādivarjam II 84, which changes s into ṣ, excepting in taís-tvám

वहः १२ वहः मध्यमेतदनडुहो यत्रैष वह आहितः—४. ११. ८; ९. ७. ३; वहेन ४. ११. ७.

१३ अव नीचीः अव नीचीरपः सृज—४. १५. १२.

१४ तुरश्चिद्विश्वम् महो गोत्रस्य क्षयति स्वराजा तुरश्चिद्विश्वमर्णवत्तपस्वान्—५. २. ८; cp.=III. 31. 21.

१५ वरिमा पार्थिवानि ययोः संख्याता वरिमा पार्थिवानि याभ्यां रजो युपितमन्तरिक्षे—४. २५. २.

वरिवतः १६ वरिमतः अभि त्वेन्द्र वरिमतः पुरा त्वांहूरणाद्धुवे—६. ९९. १.

1. Vn. अभिह्रुती. 2. Vn omits क्वचित्

१७ नव्यश्च प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि W. sátsi
६. ११०. १ = VIII. 11. 10.

१८ विश्यत्सो ? cp. अथो ये विश्यानां वधाः—६. १३. १.

१९ जाग्रत्, स्वपन् यदि जाग्रद्यदि स्वपन्नेन एनस्योऽकरम्—६. ११५. २; W. svapán
VS. 20. 16

स्वर्पतु २० स्वपन्त्वस्यै स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः—४. ५. ६.

श्वसतु २१ श्वसन्तु गर्गराः श्वसन्तु गर्गरा अपां वरुण—४. १५. १२.

अंधः २२ अन्धः परिषिक्तम् इदं वामन्धः परिषिक्तमासद्यास्मिन्बर्हिषि मादयेथाम्—
७. ५८. २ = VI. 68. 11.

सभ्यो भवतु २३ सभ्यो भवति[3] यन्त्यस्य सभां सभ्यो भवति य एवं वेद—८. १०. ५.

स्कंधः २४ वृक्षस्य स्कन्धः[4] तस्मिं छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव
शाखाः—१०. ७. ३८.

२५ शरोऽभ्रम् कब्रु फलीकरणाः शरोऽभ्रम्—११. ३. ६.

२६ अंहसः ते नो मुञ्चन्त्वंहसः—११. ६. १.

हींस्ते २७ हिंस्ते अदत्ता हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति—१२. ४. १३.

२८ सहस्रं मितः सहस्रं मित उप हि श्रयन्ताम्—१८. ३. ५१ = X.
18. 12.

रत्यतमस्माकम् २९ मयि[5] रन्तिः तेषां सप्तानां मयि रन्तिरस्तु—२. ३४. ४; ३. १०. ६.

३० तमस्माकम् वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे
७. ५०. ४ = I. 102. 4.

३१ पाकः पाकः पृच्छामि मनसाविजानन्—९. ९. ६ = I 164 5.

३२ बालास्ते बालास्ते प्रोक्षणीः सन्तु जिह्वा सं माष्ट्वग्ने—१०. ९. ३.

यानैः ३३ यानान् तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व— W svadayā
५. १२. २.

कृदंतमक्षो यामस्य कृदन्तमक्षो यमस्य :—

निरक्षात् ३४ निरक्षात् निर्वो गोष्ठादजामसि निरक्षान्निरुपानसात्—२. १४. २.

३५ तस्य नाक्षः तस्य नाक्षस्तप्यते भूरिभारः सनादेव न छिद्यते सनाभिः
९. ९. ११ = I. 164. 13.

३६ व्यानो अक्षः शुची ते चक्रे यात्या व्यानो अक्ष आहतः—१४. १. १२ =
X. 85. 12.

वरो वरयितव्यः—

गातु ३७ वराय गातुः[6] अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः—
७. ३. १; TS. 1. 7. 12. 2.

1. Vn. नव्यश्चि. 2. Vn. श्वसंन्तु. 3. Vn. सभ्या भवन्तु. 4. Vn. वक्षसा.स्कध.. 5. Vn. मपि 6. Vn. मातु.

३८ त्रयो वराः	त्रयो वरा यतमांस्त्वं वृणीषे—११. १. १०.
३९ प्रथो वरः	प्रथो वरो व्यचो लोक इति त्वोपासहे वयम्—१३.४.५३.
४० वरंवरम्	जह्येषां वरंवरं मामीषां मोचि कश्चन—३. १९. ८; ६. ६७. २; ११. ९. २०, १०. २१.
४१ अस्या वरे	अथेममस्या वर आ पृथिव्या आरेशत्रुं कृणुहि सर्ववीरम्—७. ८. १; TS 1. 2 3. 3.
४२ वरमस्याः ?	but cp. —
४३ वरं यस्याम्	प्रतीचीं दिशामियमिद्वरं यस्यां सोमो अधिपा मृडिता च—१२. ३. ९.
४४ वरानविंत्तेः	अनागमिष्यतो वरानवित्तेः संकल्पानमुच्या द्रुहः पाशान्—१६. ६. १०.

आद्युदात्त स्यात् on the margin

29a ॥ द्विषो बहुवचनम् ॥ १=२९ ॥

29b ॥ पतिमृत्विंयाय सं पितरावृत्विये सृजेथां मोघं वा देवाँ न्यो मा मोघं पृषती पृषदप्येतु पाथः कृष्णा इषिरा इन्द्रेण सख्या तमजस्रोऽजस्रं घर्मं दिवावाः शुभंयतीः सधुरारसद्भिर्थुरः सीव्यत्वपो ऽचामि वां वधायापो रक्षसो ग्राह्या उन्मत्तं रक्षसस्परि जुष्टं देवानां जुष्टो दमूनाः परो अंतो यमः परोवरो मरुतः परेषामसुराणां पुरोऽजयद्दस्यूनां बिभिद्धः पुरो यस्याः पुरो देवकृता आपस्तुरीयमिति चत्वारि तिस्रो दिवो अति दिवः उच्छिष्टेऽधिश्रिता दिवो दिवो अंग तिस्रः पौरुषेयान्न दैवादैवं समह वृष्ण्यं दैवः केतुर्दैवाय प्रस्तराय दैवा होतार ऊर्ध्वमध्वरं न इति ॥

१ द्विषो नो विश्वतोमुखाति नावेव पारय—४. ३३. ७; ६. ३४. १–५.

विद्विष इति यावद्वा ?

२ पतिमृत्विंयाय[1]	योषेव दृष्ट्वा पतिमृत्वियाय—१२. ३. २९.
३ ऋत्विये	सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः—१४. २. ३७.
(मोघं) ४ मोघं वा देवान्	मोघं वा देवाँ अप्यूहे अग्ने—८. ४. १४=VII. 104. 14.
५ यो मा मोघम्	यो मा मोघं यातुधानेत्याह—८. ४.१५=VII. 104. 15.
६ पृषती	यं त्वा पृषती रथे प्रष्टिर्वहति रोहित—१३. १. २१, २३=VIII. 7. 28.
७ पृषत्	किलासं च पलितं च निरितो नाशया पृषत्—१. २३. २, ३.

rt—thām cited as an ex under ekāraś ca I 76, which prescribes that the vowel e, when dual termination, becomes pragṛhya

1 Vn. ऋत्वियाया.

	८ अप्येतु[1] पाथः	प्रियं देवानामप्येतु पाथः—२. ३४. २; ५. १२. १०; TS. III. 1. 4. 3.	
	९ कृष्णा इषिराः	आखरे कृष्णा इषिरा अनर्तिषुः—६. ४९. ३ = X. 94. 5.	
इद्रेण सख्या	१० इन्द्रेण सख्या	इन्द्रेण सख्या शिव आ जगम्यात्—७. ४१. १.	
तमजस्रः	११ त्वमजस्रः	इहैव त्वमजस्र एध्यग्ने—७. ७८. १.	
	१२ अजस्रं घर्मम्	अजस्रं घर्ममीमहे—६. ३६. १; SV. II. 1058.	
	१३ दिवा	प्र णो वनिर्देवकृता दिवा नक्तं च कल्पताम्—५. ७. ३.	
दिवार्वाः	१४ अर्वा	न ता अर्वा रेणुककाटोऽश्नुते—४. २१. ४.	
	१५ शुम्भयतीः	शुम्भयतीरुस्रियाः सोमवर्चसः—१४. १. ३२.	
	१६ सधुराः	ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः—३. ३०. ५.	samrādháyantah cited under II. 32
	१७ असद्विथुरः	वध्रिर्यथासद्विथुरो न साधुः—१६. ६. ११.	W vithuró
सीव्यत्वपः	१८ सीव्यत्वपः	सीव्यत्वपः सूच्याछिद्यमानया—७. ४८. १ = II. 82. 4.	
वाँ	१९ वर्धायापः[2]	अर्चामि वां वर्धायापो घृतस्नू—वर्धाय । अपः १८. १. ३१ = X. 12. 4.	
	२० रक्षसो ग्राह्याः	दर्भवृक्ष मुञ्चेमं रक्षसो ग्राह्या अधि यैनं जग्राह पर्वसु—२. ९. १.	
	२१ उन्मत्तं[3] रक्षसस्परि	देवैनसादुन्मदितमुन्मत्तं रक्षसस्परि—६. १११. ३.	
	२२ जुष्टं देवानाम्	जुष्टं देवानामुत मानुषाणाम् ४. ३०. ३; cp. X. 125. 5.	
	२३ जुष्टो दमूनाः	जुष्टो दमूना अतिथिर्दुरोणे—७. ७३. ९ = V. 4. 5.	
अतः	२४ परो अन्तः	इयं वेदिः परो अन्तः पृथिव्याः—९. १०. १४ = I. 164. 35.	
	२५ यमः परोऽवरः	यमः परोऽवरो विवस्वान्ततः परं नाति पश्यामि किं चन—१८. २. ३२.	
मरुतः	२६ मरुतः परेषाम्	असौ या सेना मरुतः परेषामस्मानैत्यभ्योजसा स्पर्धमाना—३. २. ६.	
नयदस्यूनां with one *d*.	२७ पुरः	असुराणां पुरोऽजयद्दानवानां हिरण्ययीः—१०. ६. १०.	
	२८ पुरः	तैर्मेदिनो अङ्गिरसो दस्यूनां बिभिदुः[4] पुरः—१०. ६. २०.	
	२९ पुरः	यस्याः[5] पुरो देवकृताः क्षेत्रे यस्या विकुर्वते—१२. १. ४३.	
	३० आपस्तुरीयम्[6]	आपस्तुरीयममृतं तुरीयं यज्ञस्तुरीयं पशवस्तुरीयम् (१०. १०. २९) इति चत्वारि ।	
तिस्रो दिवः	३१ तिस्रो दिवः	तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशः पृथक्—४. २०. २.	

1 Vn. आप्यतु. 2. Vn. वर्द्धीयापा. 3. Vn उन्मत्वँ. 4. Vn. विभिदुः 5. Vn. यस्या 6. Vn. आपस्तुरीय.

३२ अति दिवः पक्षी हं भूत्वाति दिवः समेति—४. ३४. ४.

३३ दिवः नव भूमीः समुद्रा उच्छिष्टेऽधि श्रिता दिवः—११. ७. १४.

अंग ३४ दिवः त्रीणि रजांसि दिवो[1] अङ्ग तिस्रः—१३. ३. २१.

दैवा दैवं समह ३५ दैवात् येनयेन वा कृतं पौरुषेयान्न दैवात्—४. २६. ७.

३६ दैवम् कुष्ठस्तत्सर्वं निष्करद्दैवं समह वृष्ण्यम्—५. ४. १०.

३७ दैवः दैवः केतुर्विश्वमाभूषतीदम्—७. ११. १.

३८ दैवाय ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय—१६. २. ६.

ऊर्ध्वमध्वरन्न ३९ दैवाः दैवा होतार ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वयाभि गृणत (५. २७. ९.) इति।

MS. combines इत्यामंत्रितदैवं आद्युदात्तं स्यात् on margin

30a ॥ आमन्त्रितं दैवं दैवीरिति सर्वत्र ॥ २=३० ॥

एकपाद्वि; द्विपात्रि

30b ॥ एकपाद् द्विपदो भूयो विचक्रमे द्विपात्त्रिपादमभ्येति पश्चात्। द्विपाद्ध षट्पदो भूयोऽसितं ते प्रलयनमास्थानमसितं तवासिक्नयस्योषधे

मृणन्त असिता अलीका असितस्य गृहेभ्यः श्यावाश्वं कृष्णमसितं मृणन्तमेषि हव्यो हव्या नो अस्य यास्ते शोचयो व्युषो ह तिस्रः उषो यस्मात् ॥

१ एकपाद् द्विपदो भूयो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात्[2]।
द्विपाद्ध षट्पदो भूयो वि चक्रमे त एकपदस्तन्वं समासते—१३. २. २७, ३. २५; cp. X. 117. 8.

२ असितं ते प्रलयनमास्थानमसितं तव।
असिक्न्यस्योषधे निरितो नाशया पृषत्—१. २३. ३.

३ आ मे शृणुतासिता अलीकाः—५. १३. ५. W. ásitā alīkāḥ

४ तां वीतहव्य आभरदसितस्य गृहेभ्यः—६. १३७. १.

५ श्यावाश्वं कृष्णमसितं मृणन्तम्[3]—११. २. १८.

६ दक्षिणतो वृषभ एषि हव्यः—६. ९८. ३; MS. 4. 12. 2 . 181. 10.

७ कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषो जुषेत—७. ४७. २; TS. 3. 3. 115; MS. 4. 12. 6 : 195. 10.

८ यास्ते शोचयो रंहयो जातवेदो याभिरापृणासि दिवमन्तरिक्षम्—१८. २. ९. W. SPP. śocáyo

९ निम्रुचस्तिस्रो व्युषो ह तिस्रः—१३. ३. २१.

१० उषो यस्माद्दुष्वप्न्यादभैष्म—१६. ६. २ = VIII. 47. 18.

अर्द्ध

31 ॥ अर्धस्यासमविभागे ॥ ३=३१ ॥

अर्द्ध एष जज्ञे बहुभिः साकमित्था पूर्वे अर्धे विषिते ससन्नु—४. १. ६.

1. Vn. omits दिवः 2. Vn द्विपात्त्रपा०. 3. Vn मृणन्न

कतम सो अर्द्धः कुतस्तौ जातौ कतमः सो अर्धः कस्माल्लोकात्कतमस्याः पृथिव्याः—८. ९. १.
दिव आहुः परे अर्धे पुरीषिणम्—९. ९. १२ = 1. 164. 12.

कश्चिदर्द्धः ?

31b ॥ सुजातं सुभूत्या सुसन्नतां स्वरंकृता सुप्रतिष्ठिता सुहुतं ते अस्तु स्वधित्यं[3] स्वधित्या स्वधितिना स्वधिति जुषंतां सुकृतश्रेयं सुसमृद्धेनावरुंद्धे सुशंशितः[4] सुयतः सुश्रृतं सुदृढं सुभृतं सुहुतं सुपक्वे सुहिता स्वप्तु स्वा स्वपंतु श्वसंतु * ॥

*MS adds brāhmaṇam here

	१ सुजातम्	तं त्वा भ्रातरः सुवृधा वर्धमानमनु जायन्तां बहवः सुजातम्—२. १३. ५; ४. २३. ४; ७. २०. ५; Apmb. 2 6. 15.
	२ सुभूत्या	सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या—३. १४. १.
सन्न	३ सुसंनताम्	तां सुसंनतां कृत्वा कामो विध्यतु त्वा हृदि—३. २५. २, ३.
	४ स्वरंकृता	अभ्य१ंक्ताक्ता स्वरंकृता सर्वं भरन्ती दुरितं परेहि—१०. १. २५.
	५ सुप्रतिष्ठितम्[1]	भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्—१२. १. ६३.
	६ सुहुतम्	अग्निष्टद्धोता सुहुतं कृणोतु—६. ७१. २-३; १०. ९. २६.
	७ स्वधित्यम् ?	
	८ स्वधित्या	त्वष्टेव रूपं सुकृतं स्वधित्या—१२. ३. ३३.
	९ स्वधितिना	लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि—६. १४१. २.
जुष	१० स्वधितिं जुषन्ताम्	त्वं तान्वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम्—१८. २. ३५.
	११ सुकृतश्रेयम्	सहस्रायुः सुकृतश्चरेयम्—१७. १. २७.
	१२ सुसमृद्धेनावरुन्धे[1]	यावदग्निष्टोमेनेष्ट्वा सुसमृद्धेनावरुन्धे तावदेनेनाव रुन्धे—९. ६. ४०-४३.
सुशशितः	१३ सुसंशितः[2]	यथा बाणः सुसंशितः परापतत्याशुमत्—६. १०५. २.
	१४ सुयतः	अयं यो बद्धः सुयतो लालपीति—६. १११. १.
	१५ सुश्रृतम्[3]	सुश्रृतं मन्ये तदृतं नवीयः—७. ७२. ३ = X. 179. 3
	१६ सुदृढम्	याभ्यां कुसिन्धं सुदृढं बभूव—१०. २. ३.
	१७ सुभृतम्	स त्वा राष्ट्राय सुभृतं बिभर्तु—१३. १. १; TB 2.5.2 1
	१८ सुहुतम्	अग्निष्टद्धोता सुहुतं कृणोतु—१०. ९. २६; ६. १७. १, २.

The series of examples marked here are cited under avagrahe ca III 69, which prescribes that a grave syllable following an acute is circumflexed

1. Vn. omits सुप्रतिष्ठितं—सुसमृद्धेनावरुन्धे. 2 Vn. सुसशित'. 3 Vn. सुसृत.

१६ सुपक्वे — आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ —५. २९. ६.

२० सुहिता — त्रिषन्धेरियं सेना सुहितास्तु मे वशे—११. १०. ४.

स्वा; so all the mss of the AV. — २१ स्वप्तु स्वा — स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः— ४. ५. ६.

स्वपतु — २२ स्वपन्तु — स्वपन्त्वस्यै ज्ञातयः स्वप्त्वयमभितो जनः—४. ५. ६.

श्वसतु — २३ श्वसन्तु — श्वसन्तु गर्गरा अपां वरुण—४. १५. १२.

रतो — 32 ॥ ब्राह्मणम् । नपुंसकम्; तस्येदमिति[1] वा । जातिरन्तोदात्तम् ॥ ४=३२ ॥

तस्येदमर्थं नपुसक जातिवाचकमन्तोदात्तं वा स्यात् on margin — यदश्रवन्पशवं उद्यमानं तद्ब्राह्मणं पुनरस्मानुपैतु—७. ६६. १. (T ásra-, cp Concordance)

पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च—७. ६७. १; ŚB. 14. 9. 4. 5. (Reference in Concordance may be corrected.)

ज्येष्ठं — ज्येष्ठं ये ब्राह्मणं विदुः—१०. ७. १७.

ण on margin — स विद्याद्ब्राह्मणं महत्—१०. ८. २०, ३७.

अथो यद्ब्राह्मणं महत्—१०. ८. ३८.

तदाहुर्ब्राह्मणं महत्—१०. ८. ३३.

तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठम्—११. ५. ५, २३.

गुहा निधी निहितौ ब्राह्मणस्य—११. ५. १०.

त्रयो लोकाः संमिता ब्राह्मणेन—१२. ३. १०.

॥ १६ ॥

No fullstop in the MS. — 33 ॥ द्वितीयोदात्तानि । समानशब्दान्यन्यस्वराणि । अर्थप्रत्ययकृतः स्वरविशेषः[2] । अपवादः क्वचित् । क्वचिद्विभाषितानि ॥ ५=३३ ॥

१ अस्थिभ्यः — अस्थिभ्यस्ते मज्जभ्यः—१. ३३. ६. (This is cited under bhirbhyāmbhyassu IV 31, which prescribes separation of bhiḥ etc)

२ कर्शफस्य — कर्शफस्य विशफस्य द्यौः पिता पृथिवी माता—३. ९. १.

३ ऋत्वियः — अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः—३. २०. १.

४ रोहितम् — क्रमस्वर्श इव रोहितमनवग्लायता सदा—४. ४. ७.

५ वर्ष्मणा — उतामूं द्यां वर्ष्मणोप[3] स्पृशामि ४. ३०. ७=X. 125. 7

क्रमीणाम् — ६ क्रिमीणाम् — सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम्—५. २३. १३.

७ अररुः[4] — वरुणानी ते माता यमः पितारर्नामासि—६. ४६. १. (W. -tárarur nā-)

८ अमतिः — ऊर्ध्वा यस्यामतिर्भा[5] अदिद्युतत्सवीमनि—७. १४. २; SV. I. 464. (Concordance yasyām ati may be corrected.)

९ रमतिः — मयि सजाता रमतिर्वो अस्तु—६. ७३. २३.

वरिष्माणमस्मै on margin — १० वरिमाणम् — वर्ष्माणमस्मै वरिमाणमस्मै—७. १४. ३; KS 37. 9.

---

1. Vb. divides 4 into two दमिति वा ॥ जाति against all mss. 2. Vn स्वरविशक्यापवादः. 3. Vn. वर्मणो. 4 Vn. अररुः 5. Vn. तिर्वा.

११ वसव्यैः — हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् —७. २६. ८ ; TS. 1. 2. 13. 2.

१२ { अवकोल्बा / उदकात्मानः — अवकोल्बा उदकात्मान ओषधयः—८. ७. ९.

१३ सप्तथम् — साकंजानां सप्तथमाहुरेकजम्—९. ९. १६=1. 164. 15.

१४ चित्तिभिः — सा चित्तिभिर्नि हि चकार मर्त्यान्—९. १०. ७= 1. 164 29.

१५ अनागसः — मास्मानिंछो अनागसः—१०. १. ७.

तरुणकम् १६ तरूणकम् — दर्भः शोचिस्तरूणकमश्वस्य वारः परुषस्य वारः—१०. ४. २.

१७ अरणी याभ्याम्[1] — यो वै ते विद्यादरणी याभ्यां निर्मथ्यते वसु—१०. ८. २०.

अयुतं १८ अयुतम् — शतं ते ऽयुतं हायनान्द्वे युगे त्रीणि चत्वारि कृण्मः—८. २. २१; ८. ७. १०, ८. २४.

१९ शिक्याकृतः — तस्यैष मारुतो गणः स एति शिक्याकृतः—१३. ४. ८.

२० विवस्वतः सदने — यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते— १८. १. ३५=X. 12. 7.

पथिभ्यो न जनयः { पतिभ्यः — पतिभ्यो न जनयः शुम्भमानाः—५. १२. ५.

परिष्वजे, ष on the margin २१ { परिष्वजे — वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे—१४. १. ४६=X 40. 10.

34 ॥ अकारात्प्रतिषेधात्परमुदात्तमजरादीनाम् इति[2] ॥ ६=३४ ॥

१ अजरम् — संशितं क्षत्रमजरमस्तु—३. १९. १.

२ अमरम् ?

३ अमृतम् — अप्स्व१न्तरमृतम्—१. ४. ४=1. 23. 19.

अमृतं मित्रा ४ अमित्रः — निष्टं भज यो अमित्रो अस्य—४. २२. २.

भ्रातर इवा ५ अभ्रातर इव — अभ्रातर इव जामयः—१. १७. १; Nir. 3. 4.

६ अदृष्टः — उतादृष्टश्च हन्यताम्—५. २३. ७.

स्त=स्तं ७ असूतम्[3] — असूतं रजो अप्यगुस्ते—१०. ३. ९.

८ अजानये — उत जायामजानये—६. ६०. १.

९ असूतिका[4] — असूतिका रामायण्यपचित्प्र पतिष्यति—६. ८३. ३.

रातो 35 ॥ अकारान्तो[5] ब्रह्मा ब्रह्मण इत्यस्मिन्नर्थे[6] ॥ ७=३५ ॥

ब्रह्मा यन्मन्युतः शपात्—२. ७. २.

1. Vn. अरमाभ्या. 2. प्रतिषेधादकारात्परमजरादिपद द्वितीयोदात्त भवति on the margin 3 Vn. थसूर्वम्. 4. Vn. अग्लतिका. 5. R. अकारांतौ नपु– ब्रह्म as one sūtra, Vr. ब्रह्मा ब्रह्मण and joins 7-8. 6. P. न्न्यर्थे; Ş. स्मिन्नर्थे

ब्रह्मा चेद्धस्तमग्रहीत्स एव पतिरेकधा—५. १७. ८.

तेभिर्ब्रह्मा विध्यति देवपीयून्—५. १८. ८.

संस्थितं ब्रह्मोवासंस्थितं हविरनदन्त इमान्यवान्—६. ५०. २.

सं ब्रह्मा सं स्तौतु भद्रया—९. ४. ११.

ब्रह्मैनद्विद्यात्तपसा विपश्चित्—८. ९. ३.

ब्रह्मा सुमेधाः सो अस्मिन्मदेत—९. १. ६.

ब्रह्मायं वाचः परमं व्योम—९. १०. १४=I. 164. 35.

स ब्रह्मा वेदिता स्यात्—१०. ७. २४.

ततस्त्वा ब्रह्मोदह्वयत्—१०. १०. २२.

पुनर्ब्रह्मा वसुनीतिरग्ने—१२. २. ६.

ब्रह्मैव विद्वानेष्यो ३ यः क्रव्यादं निरादधत्—१२. २. ३९.

शुम्भती तानि ब्रह्मोत शुम्भति—१४. १. २८=X. 85 35.

सूर्यां सूर्यां यो ब्रह्मा वेद—१४. १. २९=X. 85. 34. Add véda to reference in Concordance

मंगलम् स इत्तस्योनं हरति ब्रह्मा वासः सुमङ्गलम्—१४. १. ३०.

इन्द्रो इन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु—१८. ४. १५.

ब्रह्माणस्ते यशसः सन्तु मान्ये (२. ६. २; VS. 27. 2.) इति प्रथमाया बहुवचनम्।

ब्रह्माणं च बृहस्पतिम् (३. २०. ४) इति द्वितीयाया एकवचनम्[1]।

ब्रह्मभ्यः कृणुता प्रियम् (१२. २. ३४) इति चतुर्थ्या बहुवचनम्। तानि सर्वत्र।

यद्ब्रह्मभिर्यदृषिभिः—६. १२. २.

स्त्रीकृता ब्रह्मभिः कृता—१०. १. ३.

वशायामन्तरविशदोदनो ब्रह्मणा सह—१०. १०. २५.

ब्रह्मणा दद्यात् उतैनां ब्रह्मणे दद्यात्—३. २८. २.

प्रजापतिस्तपसा ब्रह्मणेऽपचत्—४. ३५. १.

यं पपाच ब्रह्मणे ब्रह्म पूर्वम्—४. ३५. २.

अजं जीवता ब्रह्मणे देयमाहुः—९. ५. ७.

पंचौ पञ्चौदनो ब्रह्मणे दीयमानः—९. ५. ९, १०.

पचौ; ददाति पञ्चौदनं ब्रह्मणेऽजं ददाति—९. ५. ११, १२.

यो ब्रह्मणे चिकितुषे ददाति—१४. २. ४१.

युवं ब्रह्मणेऽनुमन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम्—१४. २. ४२.

अन्नं यो ब्रह्मणां मल्वः स्वाद्वन्नीति मन्यते—५. १८. ७.

ब्रह्मण ब्रह्मणां[2] हस्तेषु प्रपृथक्सादयामि (६. १२२. ५; १०. ९. २७; ११. १. २५) इति यावद्वा।

ब्रह्मणामार्षेयास्ते मा रिषन्प्राशितारः—११. १. २५.

1. Vn. एक वेचनम्. 2 Vn. ब्रह्मणाँ.

आप्लुत 36 ॥ नपुंसकमाद्युदात्तं ब्रह्मेति ॥ ८=३६ ॥

[ब्रह्माभ्यावर्ते—ब्रह्म १०. ५. ४०.]

॥ १७ ॥

37 ॥ अन्तोदात्तानि । समानशब्दान्यन्यस्वराणि । अर्थप्रत्ययकृतः स्वरविशेषः। अपवादः क्वचित् । क्वचिद्विभाषितानि ॥ ९=३७ ॥

	१ गवीन्योः	यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रुतम्—१. ३. ६; ५. २५. १०-१३.
वेशंत्याः	२ वेशन्त्याः	प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्या इव—१. ३. ७.
	३ स्रोत्याः	आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः—१. ३२. ३.
	४ यदि शोकः	यदि शोको यदि वाभिशोकः—१. २५. ३.
जभा	५ जम्भाद्विशरात्	जङ्गिडो जम्भाद्विशरात्—२. ४. २.
	६ नव्यो न	इन्द्रं जठरं नव्यो न पृणस्व—२. ५. २.
एकवाद्यां	७ एकवाद्याम्	निःसालां धृष्णुं धिषणमेकवाद्यां जिघत्स्वम्—२. १४. १.
गर्भादम्	८ गर्भादम्	गर्भादं कण्वं नाशय—२. २५. ३.
	९ अन्नादीः	अपो ऽन्नादीः कृत्वा—१५. १४. ३.
	१० अन्नादम्[1]	मनो ऽन्नादं कृत्वा—१५. १४. १.
अरसामित्	११ रसामित्	समुद्रे यस्य रसामिदाहुः—४. २. ५.
आर्शमसि	१२ आर्शमसि	उत सोमस्य भ्रातास्युतार्शमसि वृष्ण्यम्—४. ४. ५.
मह्य	१३ मह्यै	आ मारुक्षद्देवमणिर्मह्या अरिष्टतातये—८. ५. २०; ३. ५. ५.
	१४ वामदेव्यम्	वामदेव्यमुदरमोदनस्य—४. ३४. १.
खिल्ये	१५ अभिन्ने खिल्ये	अभिन्ने खिल्ये नि दधाति देवयुम्—४. २१. २.
मग्रीय	१६ शूषमग्रियः[2]	इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः (५. २. ८=X. 120. 8) इति यावद्वा ।
	१७ द्विषः	द्विषस्तदध्यर्णवेनेयसे—५. ६. ४.
	१८ उत्तरम्	उदेनमुत्तरं नयाग्ने घृतेनाहुत—६. ५. १.
गव्यं दुदुभे	१९ गव्यं दुन्दुभे[3]	अंशूनिव ग्रावाधिषवणे अद्रिर्गव्यं दुन्दुभे ऽधि नृत्य वेदः—५. २०. १०.
	२० मोघमेतत्	यदुलूको वदति मोघमेतत्—६. २९. १=X. 165. 4.
	२१ यामम्	यद्यामं चक्रुर्निखनन्तो अग्रे कार्षीवणा अन्नविदो न विद्यया—६. ११६. १.

W ārśyám, C ārsam

TB II. 8 8 11 खिल्ले

yád yāmám cited as an ex under padāntānām anuttamānām trtīyā ghosavatsvaresu II 28. yady ā Concordance may be corrected

1. Vn. अन्नादमरसा. 2. Vn. शूषष्डमग्रीय. 3. Vn. नयगव्य नभिगव्य दुंदुभे.

२२ यातुधानीः — अपाहं यातुधानीरप सर्वा अराय्यः—४. १८. ७; १. २८. ४.

२३ धरुणी — धरुण्यसि शाले—३. १२. ३.

हव्यं होतव्यम् :—

२४ हव्यम् — इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय—३. १५. ३.

२५ उपहव्यम् — उपहव्यं विषूवन्तं ये च यज्ञा गुहा हिताः—११. ७. १५.

W Lind upahávyam

२६ वेदः स्वस्तिः — वेदः स्वस्तिर्द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति—७. २८. १.

drughanáh cited as an example under pūrvapadād drughanādīnām III. 76, which prescribes cerebralisation

२७ पाथो घृतस्य — अग्नाविष्णू महि तद्वां महित्वं पाथो घृतस्य गुह्यस्य नाम—७. २९. १; TS. 1. 8. 22. 1.

२८ श्यावौ विथुरौ — उदस्य श्यावौ विथुरौ गृध्रौ द्यामिव पेततुः—७. ९५. १.

२९ हस्तिन्याः पदेन — यथा हस्ती हस्तिन्याः पदेन पदमुद्युजे—६. ७०. २.

३० यस्याः पदे — यस्याः पदे पुनते देवयन्तः—७. २७. १=RVKh. IX. 86. 1.

३१ षड्डु मासः — षडाहुः शीतान्षड्डु मास उष्णान्—८. ९. १७.

śītán sád u cited as an ex under nanebhyah katataih śasasesu II.9.

३२ वर्धयद्वर्धमाना — सा नो भूमिर्वर्धयद्वर्धमाना—१२. १. १३.

W vardhayad vár–

३३ द्विभागधनमादाय — द्विभागधनमादाय प्र क्षिणात्यवर्त्या—१२. २. ३५.

३४ मारुतो गणः — तस्यैष मारुतो गणः—१३. ४. ८.

३५ उदुम्बलौ — उरूणसावसुतृपावुदुम्बलौ—१८. २. १३=X. 14. 12.

३६ स्वर्गं यतः — स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम्—१८. ४. ५६.

३७ व्यापिथ — यथेन्द्र तन्वा३ न्तरिक्षं व्यापिथ—१७. १. १३.

W. vyápitha

३८ सलिलेन वाचः — अन्तर्दधेऽहं सलिलेन वाचः—१७. १. २९.

३९ पिशङ्गरूपो नभसः — पिशङ्गरूपो नभसो वयोधाः—९. ४. २२; cp II. 3. 9.

४० नभसो ज्योतिषीमान् — तस्मै प्र भाति नभसो ज्योतिषीमान्स्वर्गः पन्थाः सुकृते देवयानः—१८. ४. १४.

W. nábhaso jyó–

४१ भवारुद्रौ — भवारुद्रौ सयुजा संविदानौ—११. २. १४.

॥ काव्येति[1] संज्ञायामग्रन्थे ॥ १०=३८ ॥

काव्यो हिनोति — नूनं तदस्य काव्यो हिनोति—४. १. ६.

काव्यं यौ — यौ मेधातिथिमवथो यौ त्रिशोकं मित्रावरुणावुशनां काव्यं यौ—४. २९. ६.

1. N and M[5] काव्य इति, Vr काव्येति ॥ मज्ञाया two sūtras.

अतद्धितांत दक्षिणा पदं अंतोदात्त भवति on the margin

39 ॥ दक्षिणा तद्धितान्तम्[1] ॥ ११=३९ ॥

अपावृत्य गार्हपत्यात्क्रव्यादा प्रेतं दक्षिणा—१२. २. ३४.

सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः—१८. १. ४२=X. 17. 9.

आशापद अतोदात्त भवत्याशिषि on the margin

40 ॥ आशामाशिषि ॥ १२=४० ॥

वैश्वानरः पविता मा पुनातु यत्संगरमभिधावाम्याशाम्—६. ११९. ३; cp. TA. 2. 6. 1. W. dhāvāmi

एतद्रूप प्रत्ययातर वा अतोदात्त भवति on the margin चीनं

41 ॥ अर्वाचीनमिति[2] प्रत्ययान्तरं वा[3] ॥ १३=४१ ॥

अर्वाचीनं वसुविदं भगं मे रथमिवाश्वा वाजिन आ वहन्तु—३. १६. ६=VII. 41. 6.

अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनः सहुरे विश्वदावन्—४. ३२. ६= X. 83. 6.

प्रतीचो बाहून्प्रति भङ्ध्येषाम्—८. ३. ६=X. 87. 4.

महतस्तवर्णलोपः अतोदात्तश्च भवति on the margin

42-43 ॥ महो[4] देवस्य महतो देवस्येति तवर्णलोपोऽन्तोदात्तत्वं[4] च । ॥ १४=४२, ४३ ॥

१ महो देवस्य पूर्व्यस्य धाम—४. १. ६.

२ महो गोत्रस्य क्षयति स्वराजा—५. २. ८=X. 120. 8.

३ अहुतो महो धरुणाय देवा दिवीव ज्योतिः स्वमा मिमीयात्—६. ९२. ३=X. 56. 2. W. great, nom sing

४ दिवो विष्ण उत वा पृथिव्या महो विष्ण उरोरन्तरिक्षात्—७. २६. ८; MS. 1. 2. 9 : 19. 6.

५ मह स्कम्भस्य मिमानो अङ्गम्—१०. ७. २.

६ महस्पुत्रासो असुरस्य वीराः—१८. १. २=X. 10. 2

७ यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश (१८. १. ५३=X. 17. 1.) इति ।

No fullstop in the MS स्पष्टम् on the margin

44a ॥ पूर्वपदप्रकृतिस्वरः[5]—तस्यापवादः ॥ १=४४ ॥

44b ॥ कविशस्तान्यस्मै अस्मै द्यावापृथिवी सुप्रशस्तमभिश्रुतासीदिह प्रसक्तोभिस्तप्तेभिर्युवं संहितं पुष्कलं मन्त्राः कविशस्ता ये अग्निदग्धा देवानामेतत्परिषूतम् ।

